"ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सु बर्हिषि" । २२ ।
सर्व्वद्रव्ययुक्तडल्लकं गृहीत्वा,—
"ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदसि अनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा । २३ ।
इति यजुर्व्वेदीयदुर्गोत्सवपद्धतिः ॥ * ॥ सामवेदिनामधिवासमन्त्रास्तत्तद्द्रव्याणि च यथा । प्रथमं गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः योऽस्य कामं विधतो नरोषति मनोदानाय चोदयन्" । १ ।
"ॐ महित्रीणामवरस्तु द्युक्षमित्रस्यार्य्यम्णः दुराधर्षं वरुणस्य" । २ ।
इति मह्या ।
पुनर्गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः इत्यादि" । ३ ।
"ॐ त्विषदापो न पर्व्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः तत्वागिरः ।। सुष्टुतयो वाजयन्त्या जिन्नगिर्व्वर्हो जिग्युरस्वाः" । ४ ।
इति शिलया ।
"ॐ धानावन्तं करम्भिण मपूपवन्तमुक्थिनं इन्द्रप्रातर्जुषस्वनः" । ५ ।
इति धान्येन ।
"ॐ जज्ञायथा मपूर्व्व्य मघवन् वृत्रहत्याय । तत्पृथिवी मप्रथयस्तदस्तभ्ना उतो दिवम्" । ६ ।
इति दूर्व्वया ।
"ॐ पवमान व्यश्नुहि रश्मिभिर्व्वाजसातमः । दधत्स्तोत्रे सुवीर्य्यम्" । ७ ।
इति पुष्पेण ।
"ॐ इन्द्रश्रोने मधिता हवन्ते यत्पार्य्या युञ्जते धियस्ताः शूरो नृषाता श्रवसश्च कामत्वा गोमति व्रजे भजात्वन्नः" । ८ ।
इति फलेन ।
"ॐ दधिक्राव्नोऽकारिषं जिष्णोरश्वस्य वाजिनः सुरभिणो मुखाकरोत् प्रणतायुंषि तारिषत्" । ९ ।
इति दध्ना ।
"ॐ घृतवती भुवनानामधिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभितेऽजरे भूरिरेतसा" । १० ।
इति घृतेन ।
"ॐ अस्ति सोमोऽयं सुतः पिबन्त्यस्य मरुतः उतस्वराजोऽश्विना" । ११ ।
इति स्वस्तिकेन ।
"ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावा पशुमप्सु गृभ्णते" । १२ ।
इति सिन्दूरेण ।
"ॐ वसुन्वयो वसूनां यो राया मानेता य इड़ानां सोमा यः सुक्षितीनां" । १३ ।
इति शङ्खेन ।
"ॐ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते" । १४ ।
इति कज्जलेन ।
"ॐ श्रायन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागन्नदीधिमः" । १५ ।
इति रोचनया ।
"ॐ प्रणीउषा अपूर्व्वा व्युच्छति प्रिया दिवस्तुषे वा मश्विना बृहत्" । १६ ।
इति सिद्धार्थेन ।
"ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं । सनिं मेधा मयासिषं" । १७ ।
इति काञ्चनेन ।
"ॐ यद्वर्च्चो हिरण्यस्य यद्वा वर्च्चो गवामुत । सत्यस्य ब्रह्मणो वर्च्चस्तेन मा संसृजामसि" । १८ ।
इति रौप्येण ।
"ॐ रुन्महांसि सूर्य्य वड़ादित्य महां असि महस्ते सतो महिमापनिष्ट समक्षा देवमहां असिः" । १९ ॥
इति ताम्रेण ।
"ॐ मनज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं । यज्ञं समिमं दधातु विश्वे देवाः स इह मादयन्ता मों प्रतिष्ठ" । २० ।
इति दीपेन ।
"ॐ आदित्य प्रयतस्य वेत्तसो ज्योतिः पश्यन्ति वासरं पावाय दिव्यं तोदिवि" । २१ ।
इति दर्पणेन ।
"ॐ उद्यल्लोकानरोचय प्रभभूतमरोचय होइ इमान् लोकानरोचय होइ विश्वभूतमरोचय । होत्रा ऐवात्र धर्म्मो ज्योतीषि" । २२ ।
इति प्रशस्तपात्रेण । प्रशस्तपात्रं पूर्व्वोक्तसर्व्वद्रव्यस्थापितैकपात्रं । इति सामवेदीयदुर्गोत्सवपद्धतिः ॥

**अधिवासनं**, क्ली, (अधिवासयति स्थापयति देवता अनेन अधि + वस् + णिच् + करणे ल्युट् ।) अधिवासः । गन्धमाल्यादिभिः संस्कारकरणं । इत्यमरः ॥ (अनया तैलहरिद्रया अस्याः शुभाधिवासनमस्तु ॥ इति दुर्गोत्सवपद्धतिः ॥)

**अधिविन्ना**, स्त्री, (अधिविद्यते लभ्यतेऽसौ, अधि + विद् + कर्म्मणि क्तः स्त्रियां टाप् ।) अध्यूढ़ा । प्रथमविवाहिता स्त्री । कृतानेकविवाहस्वामिनः आपेक्षिकप्रथमोढ़ा भार्य्या । इत्यमरः ॥
("अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं" ॥ इति मनुः ।)

**अधिश्रयणी**, स्त्री, (अधि श्रियते पच्यतेऽत्र अधि + श्रि + अधिकरणे ल्युट् स्त्रियां ङीप् ।) चुल्ली । इत्यमरः ॥ चुला इति भाषा ।

**अधिष्ठानं**, क्ली, ( अधिष्ठीयतेऽत्र अधि + स्था + अधिकरणे ल्युट् ।) नगरं । चक्रं । प्रभावः । अध्यासनं । अवस्थानं । इत्यमरः ॥ (यथा रामायणे,—
"यद्भयात् सम्परित्यज्य स्वमधिष्ठानमृद्धिमत् ।
कैलासं पर्व्वतश्रेष्ठमध्यास्ते नरवाहनः" ॥)

**अधिक्षिप्तः**, त्रि, (अधि + क्षिप् + कर्म्मणि क्तः ।) प्रतिक्षिप्तः । इत्यमरः ॥ प्रेरितः । इति भरतः ॥ प्रणिहितः । स्थापितः । कुत्सितः । भर्त्सितः । इति मेदिनी ॥

**अधीतः**, त्रि, (अधि + इङ् + कर्म्मणि क्तः ।) कृताध्ययनः । पठितः । यथा,—
"अधीते शतसाहस्रमनन्तं वेदपारगे" ।
इति स्मृतिः ॥ पठितशास्त्रं । पाठे क्ली ॥

**अधीतिः**, स्त्री, (अधि + इङ् + भावे क्तिन् ।) अध्ययनं । पठनं । इति जटाधरः ॥

**अधीती**, [ न् ] त्रि, ( अधीतमनेन अधीत + इन् ।) अध्ययनविशिष्टः । कृताध्ययनः । इति व्याकरणं ॥

**अधीनः**, त्रि, (इनं प्रभुमधिगतः अत्यादीति समासः ।) परवशः । तत्पर्य्यायः । निघ्नः २ आयत्तः ३ अस्वच्छन्दः ४ गृह्यकः ५ । इत्यमरः ॥ (यथा कुमारसम्भवे,—
"त्वदधीनं खलु देहिनां सुखं" ॥)

**अधीरः**, त्रि, (न धीरः स्थिरः नञ्समासः ।) चञ्चलः । इति हलायुधः ॥ कातरः । इत्यमरः ॥ (यथा नागानन्दे,—
"निर्व्याजं विधुरेष्वधीर इति
मां येनाभिधत्ते भवान्" ॥)

**अधीरा**, स्त्री, (न धीरा क्षणस्थायिनी, नञ्समासः ।) विद्युत् । इति हारावली ॥ मानावस्थायां मध्याप्रगल्भनायिकयोर्भेदः ॥ तस्या लक्षणं । अव्यक्तकोपप्रकाशकत्वं । मध्याधीरायाः परुषवाक् कोपप्रकाशिका ॥ प्रौढ़ाधीरायास्तर्ज्जनताड़नादिकं कोपप्रकाशं । सा द्विधा । ज्येष्ठा कनिष्ठा च । इति रसमञ्जरी ॥

**अधीशः**, त्रि, (अधिक ईशः कर्म्मधारयः ।) अधिपतिः । प्रभुः । इति हलायुधः ॥ (यथा पञ्चतन्त्रे,—
"चन्द्रे मण्डलसंस्थे विगृह्यते राहुणा दिनाधीशः ॥)

**अधीश्वरः**, त्रि, (अधिक ईश्वरः कर्म्मधारयः ।) प्रणताशेषसामन्तः । महाराजः । चक्रवर्त्ती । इत्यमरः ॥

**अधुतं**, त्रि, अकम्पितं । धुञ्कम्पे इत्यस्मात् कर्म्मणि क्तः, पश्चान्नञ्समासः । दीर्घमध्योऽपि ॥

**अधुना**, व्य, (अस्मिन् काले इदम्शब्दस्य रूपमिति निपातनात् ।) अस्मिन्काले । इदानीं । सम्प्रति । इत्यमरः ॥

**अधुनातनं**, त्रि, (अधुना भवम् अधुना + ट्यु तुट् च ।) इदानीन्तनं । वर्त्तमानकालवृत्ति । एतत्कालीनं । इति व्याकरणं ॥

**अधृतः**, पुं, (धृ क्तः, न धृतः नञ्समासः ।) विष्णुः । इति तस्य सहस्रनाममध्ये पठितः । अकृतधारणवस्तुनि त्रि ॥

**अधृष्टः**, त्रि, ( धृष् + क्तः, न धृष्टः नञ्समासः ।) सलज्जः । तत्पर्य्यायः । अप्रगल्भः २ । इति शब्दरत्नावली ॥ शारदः ३ अप्रतिभः ४ । इति जटाधरः ॥ शालीनः ५ । इत्यमरः ॥

**अधृष्यः**, त्रि, ( धृष् + कर्म्मणि क्यप् ।) प्रगल्भः । अधर्षणीयः । इति मेदिनी ॥ (यथा रघुवंशे,—
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः" ।)

**अधृष्या**, स्त्री, (न + धृष् + संज्ञायां क्यप् । यस्यां